# Vinayakastotra

# શ્રીવિનાયકસ્તોત્રમ્

## Document Information

Text title : Vinayaka Stotram 1

File name : vinaayaka.itx

Category : ganesha, stotra

Location : doc_ganesha

Transliterated by : M Suresh msuresh at altavista.net

Proofread by : M Suresh msuresh at altavista.net

Description-comments : shrIbrahmANDapurANe skandaprokta

Latest update : January 21, 1999

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 14, 2021

*sanskritdocuments.org*

# શ્રીવિનાયકસ્તોત્રમ્

ૐ

મૂષિકવાહન મોદકહસ્ત ચામરકર્ણ વિલમ્બિતસૂત્ર ।
વામનરૂપ મહેશ્વરપુત્ર વિઘ્નવિનાયક પાદ નમસ્તે ॥

દેવદેવસુતં દેવં જગદ્વિઘ્નવિનાયકમ્ ।
હસ્તિરૂપં મહાકાયં સૂર્યકોટિસમપ્રભમ્ ॥ ૧॥

વામનં જટિલં કાન્તં હ્રસ્વગ્રીવં મહોદરમ્ ।
ધૂમ્રસિન્દૂરયુદ્ગણ્ડં વિકટં પ્રકટોત્કટમ્ ॥ ૨॥

એકદન્તં પ્રલમ્બોષ્ઠં નાગયજ્ઞોપવીતિનમ્ ।
ત્ર્યક્ષં ગજમુખં કૃષ્ણં સુકૃતં રક્તવાસસમ્ ॥ ૩॥

દન્તપાણિં ચ વરદં બ્રહ્મણ્યં બ્રહ્મચારિણમ્ ।
પુણ્યં ગણપતિં દિવ્યં વિઘ્નરાજં નમામ્યહમ્ ॥ ૪॥

દેવં ગણપતિં નાથં વિશ્વસ્યાગ્રે તુ ગામિનમ્ ।
દેવાનામધિકં શ્રેષ્ઠં નાયકં સુવિનાયકમ્ ॥ ૫॥

નમામિ ભગવં દેવં અદ્ભુતં ગણનાયકમ્ ।
વક્રતુણ્ડ પ્રચણ્ડાય ઉગ્રતુણ્ડાય તે નમઃ ॥ ૬॥

ચણ્ડાય ગુરુચણ્ડાય ચણ્ડચણ્ડાય તે નમઃ ।
મત્તોન્મત્તપ્રમત્તાય નિત્યમત્તાય તે નમઃ ॥ ૭॥

ઉમાસુતં નમસ્યામિ ગઙ્ગાપુત્રાય તે નમઃ ।
ઓઙ્કારાય વષટ્કાર સ્વાહાકારાય તે નમઃ ॥ ૮॥

મન્ત્રમૂર્તે મહાયોગિન્ જાતવેદે નમો નમઃ ।
પરશુપાશકહસ્તાય ગજહસ્તાય તે નમઃ ॥ ૯॥

મેઘાય મેઘવર્ણાય મેઘેશ્વર નમો નમઃ ।

ઘોરાય ઘોરરૂપાય ઘોરઘોરાય તે નમઃ ॥ ૧૦॥

પુરાણપૂર્વપૂજ્યાય પુરુષાય નમો નમઃ ।
મદોત્કટ નમસ્તેઽસ્તુ નમસ્તે ચણ્ડવિક્રમ ॥ ૧૧॥

વિનાયક નમસ્તેઽસ્તુ નમસ્તે ભક્તવત્સલ ।
ભક્તપ્રિયાય શાન્તાય મહાતેજસ્વિને નમઃ ॥ ૧૨॥

યજ્ઞાય યજ્ઞહોત્રે ચ યજ્ઞેશાય નમો નમઃ ।
નમસ્તે શુક્લભસ્માઙ્ગ શુક્લમાલાધરાય ચ ॥ ૧૩॥

મદક્લિન્નકપોલાય ગણાધિપતયે નમઃ ।
રક્તપુષ્પ પ્રિયાય ચ રક્તચન્દન ભૂષિત ॥ ૧૪॥

અગ્નિહોત્રાય શાન્તાય અપરાજય્ય તે નમઃ ।
આખુવાહન દેવેશ એકદન્તાય તે નમઃ ॥ ૧૫॥

શૂર્પકર્ણાય શૂરાય દીર્ઘદન્તાય તે નમઃ ।
વિઘ્નં હરતુ દેવેશ શિવપુત્રો વિનાયકઃ ॥ ૧૬॥

ફલશ્રુતિ

જપાદસ્યૈવ હોમાચ્ચ સન્ધ્યોપાસનસસ્તથા ।
વિપ્રો ભવતિ વેદાઢ્યઃ ક્ષત્રિયો વિજયી ભવેત્ ॥

વૈશ્યો ધનસમૃદ્ધઃ સ્યાત્ શૂદ્રઃ પાપૈઃ પ્રમુચ્યતે ।
ગર્ભિણી જનયેત્પુત્રં કન્યા ભર્તારમાપ્નુયાત્ ॥

પ્રવાસી લભતે સ્થાનં બદ્ધો બન્ધાત્ પ્રમુચ્યતે ।
ઇષ્ટસિદ્ધિમવાપ્નોતિ પુનાત્યાસત્તમં કુલં ॥

સર્વમઙ્ગલમાઙ્ગલ્યં સર્વપાપપ્રણાશનમ્ ।
સર્વકામપ્રદં પુંસાં પઠતાં શ્રુણુતામપિ ॥

॥ ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે સ્કન્દપ્રોક્ત વિનાયકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by M Suresh (msuresh at altavista.net)

*Vinayakastotra*

pdf was typeset on February 14, 2021

Please send corrections to *sanskrit@cheerful.com*